॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

चतुर्थकाण्डे षष्ठः प्रश्नः

परिषेचनसंस्काराभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अश्मन्नूर्जम्पर्वते शिश्रियाणाँव्वाते पर्जन्ये वरुणस्य शुष्मे। अद्भ्य ओषधीभ्यो वनस्प-
तिभ्योऽधि संभृतान्तान्न इषमूर्जन्धत्त मरुतः सꣳरराणाः॥ अश्मꣳस्ते क्षुदमुन्ते शुगृच्छतु
यन्द्विष्मः॥ समुद्रस्य त्वाऽ*वाकयाऽग्ने परि व्ययामसि। पावको अस्मभ्यꣳ शिवो भव॥
हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि। पावको अस्मभ्यꣳ शिवो भव॥ उप ॥ [१] ॥
ज्मन्नुप वेतसेऽवत्तरन्नदीष्वा। अग्ने पित्तमपामसि॥ मण्डूकि ताभिरा गहि सेमन्नो यज्ञम्। पाव-
कवर्णꣳ शिवङ्कृधि॥ पावक आ चितयन्त्या कृपा। क्षामन् रुरुच उषसो न भानुना॥ तूर्वन्
न यामन्नेतशस्य नू रण आ यो घृणे। न ततृषाणो अजरः॥ अग्ने पावक रोचिषा मन्द्रया देव
जिह्वया। आ देवान् ॥ [२] ॥ वक्षि यक्षि च॥ स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽवह।
उप यज्ञꣳ हविश्च नः॥ अपामिदन्न्ययनꣳ समुद्रस्य निवेशनम्। अन्यन्ते अस्मत् तपन्तु हेतयः
पावको अस्मभ्यꣳ शिवो भव॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्यन्ते अस्मत्
तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव॥ नृषदे वड् ॥ [३] ॥ प्सुषदे वड् वनसदे वड्
बर्हिषदे वट्थ् सुवर्विदे वट्॥ ये देवा देवानाँय्यज्ञिया यज्ञियानाꣳ सँव्वथ्सरीणमुप भागमासते।
अहुतादो हविषो यज्ञे अस्मिन्थ् स्वयञ्जुहुद्ध्वम्मधुनो घृतस्य॥ ये देवा देवेष्वधि देवत्वमायन्ये
ब्रह्मणः पुरेतारो अस्य। येभ्यो नर्ते पवते धाम किञ्चन न ते दिवो न पृथिव्या अधि स्नुषु॥
प्राणदा ॥ [४] ॥ अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः। अन्यन्ते अस्मत् तपन्तु

हेतयः पावको अस्मभ्यꣳ शिवो भव॥ अग्निस्तिग्मेन शोचिषा यꣳसद् विश्वन्न्यत्रिणम्। अग्निर् नो वꣳसते रयिम्॥ सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ [५] ॥

(उप देवान् वट् प्राणदा श्चतुश्चत्वारिꣳशच्च) ॥ १ ॥

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः। स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश॥ विश्वकर्मा मनसा यद् विहाया धाता विधाता परमोत सन्दृक्। तेषा-मिष्टानि समिषा मदन्ति यत्र सप्तऋषीन् पर एकमाहुः॥ यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान ॥ [६] ॥ यो देवानान्नामधा एक एव तꣳ सम्प्रश्नम्भुवना यन्त्यन्या॥ त आऽयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना। असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्निमानि॥ न तँव्विदाथ य इदञ्जजानान्यद् युष्माकमन्तरम्भवाति। नीहा-रेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति॥ परो दिवा पर एना ॥ [७] ॥ पृथिव्या परो देवेभिरसुरैर् गुहा यत्। कꣳ स्विद् गर्भम्प्रथमन्दध्र आपो यत्र देवाः समगच्छन्त विश्वे॥ तमिद् गर्भम्प्रथमन्दध्र आपो यत्र देवाः समगच्छन्त विश्वे। अजस्य नाभावद्ध्येकमर्पितँय्यस्मिन्नि-दँव्विश्वम्भुवनमधि श्रितम्॥ विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः। तृतीयः पिता जनितौषधीना ॥ [८] ॥ मपाङ्गर्भँव्व्यदधात् पुरुत्रा॥ चख्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नन्नमाने। यदेदन्ता अददृꣳहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम्॥ विश्व-तश्चख्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्। सम्बाहुभ्यान्नमति सम्पतत्रैर् द्यावा-पृथिवी जनयन् देव एकः॥ किꣳ स्विदासीदधिष्ठानमारम्भणङ्कतमत् स्वित् किमासीत्। यदी भूमिञ्जनयन् ॥ [९] ॥ विश्वकर्मा वि द्यामौर्णोन् महिना विश्वचख्षाः॥ किꣳ स्विद्वनङ्क उ स वृख्ष आसीद्यतो द्यावापृथिवी निष्टतख्षुः। मनीषिणो मनसा पृच्छतेदु तद्यदद्ध्यतिष्ठद् भुवनानि धारयन्न्॥ या ते धामानि परमाणि याऽवमा या मद्ध्यमा विश्वकर्मन्नुतेमा। शिख्षा सखिभ्यो हविषि स्वधावः स्वयँय्यजस्व तनुवञ्जुषाणः॥ वाचस्पतिँव्विश्वकर्माणमूतये ॥ [१०] ॥ मनो-युजँव्वाजे अद्या हुवेम। स नो नेदिष्ठा हवनानि जोषते विश्वशम्भूरवसे साधुकर्मा॥ विश्वकर्म-

नहविषा वावृधानः स्वयँय्यँजस्व तनुवञ्जुषाणः। मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकम्मघवा सूरिरस्तु॥ विश्वकर्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम्। तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत्॥ समुद्राय वयुनाय सिन्धूनाम्पतये नमः। नदीनाꣳ सर्वासा-म्पित्रे जुहुता विश्वकर्मणे विश्वाऽहाऽमर्त्यꣳ हविः ॥ [११] ॥

(जजानै नौ षधीनां ꣳ भूमिञ्जनयं न्नूतये नमो नव च) ॥ २ ॥

उदेनमुत्तरान्नयाग्ने घृतेनाऽऽहुत। रायस्पोषेण सꣳ सृज प्रजया च धनेन च॥ इन्द्रेमम्प्रत-राङ्कृधि सजातानामसद्वशी। समेनँव्वर्चसा सृज देवेभ्यो भागधा असत्॥ यस्य कुर्मो हविर् गृहे तमग्ने वर्द्धया त्वम्। तस्मै देवा अधि ब्रवन्नयञ्च ब्रह्मणस्पतिः॥ उदु त्वा विश्वे देवा ॥ [१२] ॥ अग्ने भरन्तु चित्तिभिः। स नो भव शिवतमः सुप्रतीको विभावसुः॥ पञ्च दिशो दैवीर् यज्ञम-वन्तु देवीरपामतिन्दुर्मतिम्बाधमानाः। रायस्पोषे यज्ञपतिमाभजन्तीः॥ रायस्पोषे अधि यज्ञो अस्थाथ् समिद्धे अग्नावधि मामहानः। उक्थपत्र ईड्यो गृभीतस्तप्तङ्घर्मम्परिगृह्यायजन्त॥ ऊर्जा यद्यज्ञमशमन्त देवा दैव्याय धर्त्रे जोष्ट्रे। देवश्रीः श्रीमणाः शतपयाः ॥ [१३] ॥ परिगृह्य देवा यज्ञमायन्न्॥ सूर्यरश्मिर्हरिकेशः पुरस्ताथ् सविता ज्योतिरुदयाꣳ अजस्रम्। तस्य पूषा प्रसवँय्याति देवः संपश्यन् विश्वा भुवनानि गोपाः॥ देवा देवेभ्यो अद्ध्वर्यन्तो अस्थुर् वीतꣳ शमित्रे शमिता यजद्ध्यै। तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्ताम्॥ विमान एष दिवो मद्ध्य आस्त आपप्रिवान् रोदसी अन्तरिख्षम्। स विश्वाचीरभि ॥ [१४] ॥ चष्टे घृताचीरन्तरा पूर्वमपरञ्च केतुम्॥ उख्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिम्पितुरा विवेश। मद्ध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ॥ इन्द्रँव्विश्वा अवी-वृधन्थ् समुद्रव्यचसङ्गिरः। रथीतमꣳ रथीनाँव्वाजानाꣳ सत्पतिम्पतिम्॥ सुम्नहूर् यज्ञो देवाꣳ आ च वख्षद्यख्षदग्निर् देवो देवाꣳ आ च वख्षत्॥ वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत्। अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः॥ उद्ग्राभञ्च निग्राभञ्च ब्रह्म देवा अवीवृधन्न्। अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥ [१५] ॥

(देवाः शतपया अभि वाजस्य षड्विꣳशतिश्च) ॥ ३ ॥

आशुः शिशानो वृषभो न युद्ध्मो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयथ् साकमिन्द्रः॥ संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तथ् सहद्ध्वय्ँयुधो नर इषुहस्तेन वृष्णा॥ स इषुहस्तैः स निषंगिभिर् वशी सꣳस्रष्टा स युध इन्द्रो गणेन। सꣳसृष्टजिथ् सोमपा बाहुशर्द्ध्यूर्द्ध्वधन्वा प्रतिहिताभिरस्ता॥ बृहस्पते परि दीया ॥ [१६] ॥ रथेन रक्षोहाऽमित्राꣳ अपबाधमानः। प्रभञ्जन्थ् सेनाः प्रमृणो युधा जयन्नस्माकमेद्ध्यविता रथानाम्॥ गोत्रभिदङ्गोविदव्ँवज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा। इमꣳ सजाता अनु वीरयद्ध्वमिन्द्रꣳ सखायोऽनु सꣳ रभद्ध्वम्॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्॥ अभि गोत्राणि सहसा गाहमानोऽदायो ॥ [१७] ॥ वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुद्ध्योस्माकꣳ सेना अवतु प्र युथ्सु॥ इन्द्र आसान्नेता बृहस्पतिर् दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रे॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानाम्मरुताꣳ शर्द्ध उग्रम्। महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात्॥ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकय्ँया इषवस्ता जयन्तु ॥ [१८] ॥ अस्माकव्ँवीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु॥ उद्धर्षय मघवन्नायुधान्युथ् सत्वनाम्मामकानाम्महाꣳसि। उद्वृत्रहन् वाजिनाव्ँवाजिनान्युद्रथानाञ्जयतामेतु घोषः॥ उप प्रेत जयता नरः स्थिरा वः सन्तु बाहवः। इन्द्रो वः शर्म यच्छत्वनाधृष्या यथाऽसथ॥ अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिता। गच्छामित्रान् प्र ॥ [१९] ॥ विश मैषाङ्कञ्चनोच्छिषः॥ मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभि वस्ताम्। उरोर् वरीयो वरिवस्ते अस्तु जयन्तन्त्वामनु मदन्तु देवाः॥ यत्र बाणाः संपतन्ति कुमारा विशिखा इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥ [२०] ॥

(दीया दायो जयन्त्व मित्रान् प्र चत्वारिꣳशच्च) ॥ ४ ॥

प्राचीमनु प्रदिशम्प्रेहि विद्वानग्नेरग्ने पुरोअग्निर् भवेह। विश्वा आशा दीद्यानो वि भाह्यूर्जन्नो धेहि द्विपदे चतुष्पदे॥ क्रमद्ध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः। दिवः पृष्ठꣳ सुवर् गत्वा मिश्रा देवेभिराद्ध्वम्॥ पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद् दिवमाऽरुहम्। दिवो नाकस्य पृष्ठाथ् सुवर्ज्योतिरगा ॥ [२१] ॥ महम्॥ सुवर् यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी। यज्ञꣳये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे॥ अग्ने प्रेहि प्रथमो देवयताञ्चक्षुर् देवानामुत मर्त्यानाम्। इयक्षमाणा भृगुभिः सजोषाः सुवर् यन्तु स्वस्ति॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची। द्यावा क्षामा रुक्मो अन्तर् वि भाति देवा अग्निन्धारयन् द्रविणोदाः॥ अग्ने सहस्राक्ष ॥ [२२] ॥ शतमूर्द्धञ्छतन्ते प्राणाः सहस्रमपानाः। त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा॥ सुपर्णोऽसि गरुत्मान् पृथिव्याꣳ सीद पृष्ठे पृथिव्याः सीद भासाऽन्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद् दृꣳह॥ आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वाँय्योनिमा सीद साद्ध्या। अस्मिन्थ्सधस्थे अद्ध्युत्तरस्मिन् विश्वे देवा ॥ [२३] ॥ यजमानश्च सीदत॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वाꣳ शश्वन्त उप यन्ति वाजाः॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे। यस्माद्योनेरुदारिथा यजे तम्प्र त्वे हवीꣳषि जुहुरे समिद्धे॥ ताꣳ सवितुर् वरेण्यस्य चित्रामाऽहँवृणे सुमतिँविश्वजन्याम्। यामस्य कण्वो अदुहत् प्रपीनाꣳ सहस्रधाराम् ॥ [२४] ॥ पयसा महीङ्गाम्॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन॥ ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः॥ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्चात्यꣳहाः ॥ [२५] ॥ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरेअमित्रश्च गणः॥ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः॥ ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन। मितासश्च संमितासश्च न ऊतये सभरसो मरुतो यज्ञे अस्मिन्निन्द्रन्दैवीर् विशो मरुतोऽनुवर्त्मानो यथेन्द्रन्दैवीर् विशो मरुतोऽनुवर्त्मान एवमिमँय्यजमानन्दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ [२६] ॥

(अगाꣳ सहस्राक्ष देवाः सहस्रधारा मत्यꣳहा अनुवर्त्मानः षोडश च) ॥ ५ ॥

जीमूतस्येव भवति प्रतीकँय्यद्वर्मी याति समदामुपस्थे। अनाविद्धया तनुवा जय त्वꣳ स
त्वा वर्मणो महिमा पिपर्तु॥ धन्वना गा धन्वनाऽऽजिञ्जयेम धन्वना तीव्राः समदो जयेम।
धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम॥ वक्ष्यन्तीवेदा गनीगन्ति कर्णम्प्रियꣳ
सखायम्परिषस्वजाना। योषेव शिङ्क्ते वितताऽधि धन्वन् ॥ [२७] ॥ ज्या इयꣳ समने पार-
यन्ती॥ ते आचरन्ती समनेव योषा मातेव पुत्रम्बिभृतामुपस्थे। अप शत्रून्विद्ध्यताꣳ सꣳविदाने
आर्त्नी इमे विष्फुरन्ती अमित्रान्॥ बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनाऽवगत्य।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः॥ रथे तिष्ठन् नयति वाजिनः पुरो
यत्रयत्र कामयते सुषारथिः। अभीशूनाम्महिमानं ॥ [२८] ॥ पनायत मनः पश्चादनु यच्छन्ति
रश्मयः॥ तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः। अवक्रामन्तः प्रपदै-
रमित्रान् क्षिणन्ति शत्रूꣳरनपव्ययन्तः॥ रथवाहनꣳ हविरस्य नाम यत्राऽऽ*युधन्निहितमस्य
वर्म। तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः॥ स्वादुषꣳसदः पितरो वयोधाः
कृच्छ्रेश्रितः शक्तीवन्तो गभीराः। चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः॥
ब्राह्मणासः ॥ [२९] ॥ पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा। पूषा नः पातु दुरि-
तादृतावृधो रक्षा माकिर् नो अघशꣳस ईशत॥ सुपर्णँव्वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा
पतति प्रसूता। यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन्न्॥ ऋजीते परि
वृङ्धि नोऽश्मा भवतु नस्तनूः। सोमो अधि ब्रवीतु नोऽदितिः ॥ [३०] ॥ शर्म यच्छतु॥ आ
जङ्घन्ति सान्वेषाञ्जघनाꣳ उप जिघ्नते। अश्वाजनि प्रचेतसोऽश्वान्थ्समथ्सु चोदय॥ अहिरिव
भोगैः पर्येति बाहुञ्ज्याया हेतिम्परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳस-
म्परि पातु विश्वतः॥ वनस्पते वीड्वङ्गो हि भूया अस्मथ्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो
असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि॥ दिवः पृथिव्याः पर्यो ॥ [३१] ॥ ज उद्धृ-
तँव्वनस्पतिभ्यः पर्याभृतꣳ सहः। अपामोज्मानम्परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथ-
य्यँज॥ इन्द्रस्य वज्रो मरुतामनीकम्मित्रस्य गर्भो वरुणस्य नाभिः। सेमान्नो हव्यदातिञ्जुषाणो
देव रथ प्रति हव्या गृभाय॥ उप श्वासय पृथिवीमुत द्याम्पुरुत्रा ते मनुताँव्विष्ठितञ्जगत्। स

दुन्दुभे सजूरिन्द्रेण देवैर् दूरा ॥ [३२] ॥ द्वीयो अप सेध शत्रून्॥ आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः। अप प्रोथ दुन्दुभे दुच्छुनां इत इन्द्रस्य मुष्टिरसि वीडयस्व॥ आऽमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर् वावदीति। समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ [३३] ॥

(धन्वन् महिमानं ब्राह्मणासो ऽदितिः पृथिव्याः परि दूरा देकचत्वारिंशच्च) ॥ ६ ॥

यदक्रन्दः प्रथमञ्जायमान उद्यन्थ् समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यम्महि जातन्ते अर्वन्न्॥ यमेन दत्तन्त्रित एनमायुनगिन्द्र एणम्प्रथमो अद्ध्यतिष्ठत्। गन्धर्वो अस्य रशनामगृभ्णाथ् सूरादश्वँव्वसवो निरतष्ट॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्त ॥ [३४] ॥ आहुस्ते त्रीणि दिवि बन्धनानि॥ त्रीणि त आहुर् दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे। उतेव मे वरुण श्छन्थ्स्यर्वन्यत्रा त आहुः परमञ्जनित्रम्॥ इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर् निधाना। अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः॥ आत्मानन्ते मनसाऽऽरादजानामवो दिवा ॥ [३५] ॥ पतयन्तम्पतङ्गम्। शिरो अपश्यम्पथिभिः सुगेभिररेणुभिर् जेहमानम्पतत्रि॥ अत्रा ते रूपमुत्तममपश्यञ्जिगीषमाणमिष आ पदे गोः। यदा ते मर्तो अनु भोगमानडादिद् ग्रसिष्ठ ओषधीरजीगः॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम्। अनु व्रातास-स्तव सख्यमीयुरनु देवा ममिरे वीर्यं ॥ [३६] ॥ ते॥ हिरण्यश्रृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत्। देवा इदस्य हविरद्यमायन्यो अर्वन्तम्प्रथमो अद्ध्यतिष्ठत्॥ ईर्मान्तासः सिलिकमद्ध्यमासः सं शूरणासो दिव्यासो अत्याः। हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर् दिव्यमज्ममश्वाः॥ तव शरीरम्पतयिष्ण्वर्वन् तव चित्तँव्वात इव ध्रजीमान्। तव श्रृङ्गाणि विष्ठिता पुरुत्राऽरण्येषु जर्भुराणा चरन्ति॥ उप ॥ [३७] ॥ प्रागाच्छसनँव्वाज्यर्वा देवद्रीचा मनसा दीद्ध्यानः। अजः पुरो नीयते नाभिरस्यानु पश्चात् कवयो यन्ति रेभाः॥ उप प्रागात् परमँय्यथ् सधस्थमर्वां अच्छा पितरम्मातरञ्च। अद्या देवान् जुष्टतमो हि गम्या अथाऽऽशास्ते दाशुषे वार्याणि ॥ [३८] ॥

(विपृक्तो दिवा वीर्यं मुपै कान्नचत्वारिꣳशच्च) ॥ ७ ॥

मा नो मित्रो वरुणो अर्यमाऽऽयुरिन्द्र ऋभुक्षा मरुतः परि ख्यन्न्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि॥ यन्निर्णिजा रेक्णसा प्रावृतस्य रातिङ्गृभीताम्मुखतो नयन्ति। सुप्राङजो मेम्यद् विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः॥ एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः। अभिप्रियँय्यत् पुरोडाशमर्वता त्वष्टे ॥ [३९] ॥ देनꣳ सौश्रवसाय जिन्वति॥ यद्धविष्यमृतुशो देवयानन्त्रिर् मानुषाः पर्यश्वन्नयन्ति। अत्रा पूष्णः प्रथमो भाग एति यज्ञन्देवेभ्यः प्रतिवेदयन्नजः॥ होताऽद्ध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शꣳस्ता सुविप्रः। तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणद्ध्वम्॥ यूपव्रस्का उत ये यूपवाहाश्चषालँय्ये अश्वयूपाय तक्षति। ये चार्वते पचनꣳ संभरन्त्युतो ॥ [४०] ॥ तेषामभिगूर्तिर् न इन्वतु॥ उप प्रागाथ् सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः। अन्वेनव्विप्रा ऋषयो मदन्ति देवानाम्पुष्टे चकृमा सुबन्धुम्॥ यद्वाजिनो दाम सन्दामर्वतो या शीर्षण्या रशना रज्जुरस्य। यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते अपि देवेष्वस्तु॥ यदश्वस्य क्रविषो ॥ [४१] ॥ मक्षिकाऽऽश यद्वा स्वरौ स्वधितौ रिप्तमस्ति। यद्धस्तयोः शमितुर् यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु॥ यदूवद्ध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति। सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ शृतपाकम्पचन्तु॥ यत् ते गात्रादग्निना पच्यमानादभि शूलन्निहतस्यावधावति। मा तद्भूम्यामा श्रिष न्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ [४२] ॥

(इ दुतो क्रविषः श्रिषथ् सप्त च) ॥ ८ ॥

ये वाजिनम्परिपश्यन्ति पक्वँय्य ईमाहुः सुरभिर् निर् हरेति। ये चार्वतो माꣳसभिक्षामुपासत उतो तेषामभिगूर्तिर् न इन्वतु॥ यन्नीक्षणम्माꣳस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि। ऊष्मण्याऽपिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम्॥ निक्रमणन्निषदनव्विवर्तनँय्यच्च पड्बीशमर्वतः। यच्च पपौ यच्च घासिं ॥ [४३] ॥ जघास सर्वा ता ते अपि देवे-

ष्वस्तु॥ मा त्वाऽग्निर् ध्वनयिद्धूमगन्धिर् मोखा भ्राजन्त्यभि विक्त जघ्रिः। इष्टव्वीतमभिगूर्तव्व-षट्कृतन्तन्देवासः प्रति गृभ्णन्त्यश्वम्॥ यदश्वाय वास उपस्तृणन्त्यधीवासय्या हिरण्यान्यस्मै। सन्दानमर्वन्तम्पड्बीशम्प्रिया देवेष्वा यामयन्ति॥ यत् ते सादे महसा शूकृतस्य पार्ष्णिया वा कशया ॥ [४४] ॥ वा तुतोद। स्रुचेव ता हविषो अद्ध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि॥ चतुस्त्रिꣳशद्वाजिनो देवबन्धोर् वङ्क्रीरश्वस्य स्वधितिः समेति। अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त॥ एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथर्तुः। या ते गात्राणामृतुथा कृणोमि ताता पिण्डानाम्प्र जुहोम्यग्नौ॥ मा त्वा तपत् ॥ [४५] ॥ प्रिय आत्माऽपियन्तम्मा स्वधितिस्तनुव आ तिष्ठिपत् ते। मा ते गृध्नुरविशस्ताऽतिहाय छिद्रा गात्राण्यसिना मिथू कः॥ न वा उवेतन्म्रियसे न रिष्यसि देवाꣳ इदेषि पथिभिः सुगेभिः। हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य॥ सुगव्यन्नो वाजी स्वश्वियम्पुꣳसः पुत्राꣳ उत विश्वापुषꣳ रयिं। अनागास्त्वन्नो अदितिः कृणोतु क्षत्रन्नो अश्वो वनताꣳ हविष्मान् ॥ [४६] ॥

(घासिं कशया तपद् रयिं नव च) ॥ ९ ॥

समाप्ति कोर्वैः

(अश्मन् य इमो देन माशुः प्राचीं जीमूतस्य यदक्रन्दो मा नो मित्रो ये वाजिनं नव)
(अश्मन् मनोयुजं प्राचीमनु शर्म यच्छतु तेषामभिगूर्तिः षट्चत्वारिꣳशत्)
(अश्मन् हविष्मान्)

॥ हरिः ॐ ॥

चतुर्थकाण्डे षष्ठः प्रश्नः समाप्तः

अनुवाकाः	पञ्चाशत्यः
९	४६

ॐ